10. माता भोजनं पचति – मात्रा भोजनं पच्यते

शेखावाटी मिशन–100

11. दर्शकाः नाटकं पश्यन्ति – दर्शकैः नाटकं दृश्यते

12. वयं विद्यालयं गच्छामः – अस्माभिः विद्यालयः गम्यते

13. त्वं फलानि खादसि – – त्वया फलानि खाद्यन्ते

14. एतेन गीतं गीयते – एषः गीतं गायति।

15. अहं श्लोकान् पठामि – मया श्लोकाः पठ्यन्ते

**प्रश्न – अधोलिखित वाक्यानि शुद्धं कृत्वा लिखत–**

1. राजपुरुषः चौरस्य अनुधावति। – राजपुरुषः चौरम् अनुधावति।
2. ग्रामस्य परितः जलम् अस्ति। – ग्रामं परितः जलम् अस्ति।
3. साधुः दुर्जनेन जुगुप्सते। – साधुः दुर्जनात् जुगुप्सते।
4. अहं रेलयानात् ग्रामं गतिष्याभि। – अहं रेलयानेन ग्रामं गमिष्यामि।
5. ईश्वरं नमः। – ईश्वराय नमः।
6. अध्यापकः आसनम् तिष्ठति। – अध्यापकः आसने तिष्ठति।
7. माम् मिष्टान्नं रोचते। – मह्यं/मे मिष्टान्नं रोचते।
8. अलं विवादम्। – अलं विवादेन।
9. सुरेशः नेत्रेण अन्धः अस्ति। – सुरेशः नेत्राभ्याम् अन्धः अस्ति।
10. सः सुखं लभति। – सः सुखं लभते।
11. भवान् तत्र गच्छसि। – भवान् तत्र गच्छति।
12. पिता पुत्रे क्रध्यति। – पिता पुत्राय क्रुध्यति।
13. बालकाः पाठं पठति। – बालकाः पाठं पठन्ति।
14. चत्वारः बालिकाः चतस्रः फलानि खादन्ति। – चतस्रः बालिकाः चत्वारि फलानि खादन्ति।

**अधोलिखितवाक्यानां संस्कृतेन अनुवादं कुरुत–**

1. जल के बिना जीवन संभव नहीं है। – जलं/जलेन/जलात् विना जीवनं सम्भवं नास्ति।
2. राम के साथ श्याम जाता है। – रामेण सह श्यामः गच्छति।
3. बच्चा गेंद से खेलता है। – बालकः कन्दुकेन क्रीडति।
4. हम दोनों घर जाएंगे। – आवां ग्रहं गमिष्यावः।
5. वृक्ष से पत्ते गिरते हैं। – वृक्षात् पत्राणि पतन्ति।
6. वह सिर से गंजा है। – सः शिरसा खल्वाटः अस्ति।
7. गाँव के बाहर एक मन्दिर है। – ग्रामाद् बहिः एकं मन्दिरम् अस्ति।
8. यह मोहन का घर है। – इदं मोहनस्य गृहम् अस्ति।
9. मोहन सोहन से चतुर है। – मोहनः सोहनात् पटुतरः अस्ति।
10. बालिकाओं में रमा सबसे चतुर है। – बालिकानां/बालिकासु रमा पटुतमा।
11. मैं कल जयपुर जाऊँगा। – अहं श्वः जयपुरं गमिष्यामि।
12. गंगा हिमालय से निकलती है। – गंगा हिमालयात् प्रभवति।
13. माता पुत्र से स्नेह करती है। – माता पुत्रे स्निह्यति।
14. हमें सत्य बोलना चाहिए। – वयं सत्यं वदेम।
15. छात्र गुरू से प्रश्न पूछता है। – छात्रः गुरुं प्रश्नं पृच्छति।
16. मुझे लड्डू अच्छे लगते हैं। – मह्य/मे मोदकानि रोचन्ते।
17. मेरी कक्षा में तीस छात्र हैं। – मयि कक्षायां त्रिंशत् छात्राः सन्ति।
18. दस बज गये। – इदानीं दशवादनं जातम्।
19. हमें संस्कृत पढ़नी चाहिए। – वयं संस्कृतं पठेम।
20. कक्षा–कक्ष के बाहर शिक्षक हैं। – कक्षाकक्षाद् बहिः शिक्षकाः सन्ति।

प्रश्न – अंकानां स्थाने संस्कृतपदैः समयलेखनं कुरूत–

1. महेशः रात्रौ–––– शयंन करोति। (10:15) –सपाददशवादने
2. शताब्दी रेलयानं––––जयपुरात् देहलीं गच्छति। (9:45) –पादोनदशवादने
3. सीमा प्रातः––––विद्यालयं गच्छति। (9:10) –दशकलोत्तर–नववादने
4. सा पुनः–––– गृहं आगच्छति। (3:05) –पंचकलोत्तर–त्रिवादने
5. मोहनः प्रातः काले––––मन्दिरं गच्छति। (8:00) –अष्टवादने
6. सः सांयकाले––––भ्रमणाय गच्छति। (6:30) –सार्धषड्वादने
7. लता––––अल्पाहारं करोति। (7:45) –पादोनअष्टवादने/पादोनाष्टवादने
8. त्वम् मध्याह्ने ––––भोजनं करोति। (1:30) –सार्धएकवादने/सार्धेकवादने
9. प्रातः––––सरस्वती वन्दनां कुरुत। (6:00) षड्वादने
10. सः––––विद्यालयात् गृहम आगच्छति। (4:00) सार्धचतुर्वादने

प्रश्न – रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–

1. भवतः सदा विजयः एव भविष्यति।

उत्तरम्– कस्य सदा विजयः एवं भविष्यति ?

2. एतेन मम न अपमानः।

उत्तरम्– एतेन कस्य न अपमानः ?

3. भवान् सत्यं वदति।

उत्तरम्– भवान् किं वदति ?

4. सूरजमल्लस्य अपरं नाम सुजानसिंहः आसीत्।

उत्तरम्– सूरजमल्लस्य अपरं नाम किम् आसीत् ?

5. नायकेषु अन्यतमः सूरजमल्लः आसीत्।

उत्तरम्– केषु अन्यतमः सूरजमल्लः आसीत् ?

6. सूरजमल्लः अद्वितीयः योद्धा आसीत्।

उत्तरम्– सूरजमल्लः कीदृशः योद्धा आसीत् ?

7. कोऽपि शासकः सूरजमल्लेन तुल्यः न दृश्यते स्म।

उत्तरम्– कोऽपि शासकः केन तुल्यः न दृश्यते स्म ?

8. स्वकीया मातृभूमिः न दातव्या।

उत्तरम्– का न दातव्या ?

9. स्वाध्यायात् मा प्रमदः।

उत्तरम्– कस्मात् मा प्रमदः ?

10. भूत्यै न प्रमदितव्यम्।

उत्तरम्– कस्यै न प्रमदितव्यम् ?

11. श्रिया देयम्।

उत्तरम्– कया देयम् ?

12. मातृदेवो भव।

उत्तरम्– मातृ कीदृशी भव ?

13. अनवद्यानि कर्माणि सेवितव्यानि।

उत्तरम्– कानि सेवितव्यानि ?

14. एवम् उपासितव्यम्।

उत्तरम्– कथम् उपासितव्यम् ?

15. एषः आदेशः।

उत्तरम्– एषः कः ?

16. हिमालयाद् समारभ्य इन्दुसरोवरं यावत्।

उत्तरः– कस्माद् समारभ्य इन्दुसरोवरं यावत्?

17. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

उत्तरः– का स्वर्गादपि गरीयसी?

शेखावाटी मिशन–100

18. देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।

उत्तरः— देवनिर्मितं देशं किम् प्रचक्षते?

19 राष्ट्रियाः सर्वदा शिक्षणीयाः।

उत्तरः— के सर्वदा शिक्षणीयाः?

20. पृथिव्यां त्रीणि रत्नानि सन्ति।

उत्तरः— पृथिव्यां कति रत्नानि सन्ति?

21. अहिंसा परमो धर्मः।

उत्तरः— कः परमो धर्मः?

22 तृणात् क्षीरं संजायते।

उत्तरः— कस्मात् क्षीरं संजायते?

23. मूढैः पाषाण–खण्डेषु रत्नसंज्ञा विधीयते।

उत्तरः— मूढैः केषु रत्नसंज्ञा विधीयते?

24. वचने दरिद्रता न कर्त्तव्या।

उत्तरः— वचने का न कर्त्तव्या?

25. मरूदेशे तित्तिराणां मधुरो विरावः भवति।

उत्तरः— मरूदेशे केषां मधुरो विरावः भवति?

26. व्रतदानयज्ञैः देवाः प्रसन्नाः सन्ति।

उत्तरः— कैः देवाः प्रसन्नाः सन्ति?

27. मरौ तुन्दिलाः कलिङ्गाः भवन्ति।

उत्तरः— मरौ कीदृशाः कलिङ्गाः भवन्ति?

**पाठ्यपुस्तकाधारित–अतिलघूत्तरात्मकप्रश्नानि**

प्रश्न – अधोलिखितानां प्रश्नानां उत्तराणि संस्कृतेन लिखत–

1. काव्येषु किं रम्यम् उच्यते?

उत्तर– काव्येषु नाटकं रम्यम् उच्यते।

2. अभिज्ञानशाकुन्तलस्य रचयिता कः?

उत्तर– अभिज्ञानशाकुन्तलस्य रचयिता महाकविः कालिदासः।

3. राजा दुष्यन्तः कस्य आश्रमं प्रविशति?

उत्तर– राजा दुष्यन्तः महर्षेः मारीचस्य आश्रमं प्रविशति।

4. सिंहशिशुं बलात्कारेण कः कर्षति?

उत्तर– सिंहशिशुं बलात्कारेण बालकः सर्वदमनः कर्षति।

5. वर्णचित्रितः मृत्तिकामयूरः कस्य आसीत्?

उत्तर– वर्णचित्रितः मृत्तिकामयूरः मार्कण्डेयस्य ऋषिकुमारस्य आसीत्।

6. बालकस्य सर्वदमनस्य मातुः नाम किमासीत्?

उत्तर– बालकस्य सर्वदमनस्य मातुः नाम शकुन्तला आसीत्।

7. शकुन्तला कस्य राजर्षेः पत्नी आसीत्?

उत्तर– शकुन्तला राजर्षेः दुष्यन्तस्य पत्नी आसीत्।

8. सर्वदमनः सिंहशावकं किमर्थं कर्षति?

उत्तर– सर्वदमनः सिंहशावकं क्रीड़ितुं कर्षति।

9. तापसी कस्य नाम संकीर्तयितुं न इच्छति?

उत्तर– तापसी धर्मदारपरित्यागिनः नृपस्य नाम संकीर्तयितुं न इच्छति।

10. ''हन्त, वर्धते ते संरम्भयः'' कस्य संरम्भः वर्धते?

उत्तर– बालकस्य सर्वदमनस्य संरम्भ वर्धते।

11. इयम् कस्य अभूमिः?

उत्तर– इयम् अविनयस्य अभूमिः।

12. सर्वदमनस्य मणिबन्धे किम् आबद्धम् आसीत्?

उत्तर– सर्वदमनस्य मणिबन्धे रक्षाकरण्डकम् आबद्धम आसीत।

13. तापसी केन पदार्थेन निर्मित मयूरम् आनयति?
उत्तर— तापसी मृतिकानिर्मितम् पदार्थेन मयूरम् आनयति।
14. प्रतापस्य सेना केषु कुशला आसीत्?
उत्तर— प्रतापस्य सेना पर्वतीययुद्धेषु कुशला आसीत्।
15. प्रतापः बाल्यकालादेव कीदृशः आसीत्?
उत्तर— प्रतापः बाल्यकालादेव वीरयोद्धा, कुशलसेनानी, धीरनायकश्च आसीत।
16. उदयसिंहस्य अनन्तरं कः मेवाडराज्यसिंहासनम् आरूढवान्?
उत्तर— उदयसिंहस्य अनन्तंर प्रतापः मेवाड़राज्यसिंहासनम् आरूढवान्।
17. मेवाड़राज्यस्य कस्मिन् वंशे वीराणां सुदीर्घा परम्परा विद्यते?
उत्तर— मेवाड़राज्यस्य सिसोदियावंशे वीराणां सुदीर्घा परम्परा विद्यते।
18. केन सह प्रतापस्य अनेकवारं युद्धम् अभवत?
उत्तर— अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत।
19. हल्दीघाटीयुद्धे प्रतापः कस्मिन् आरुह्य बहुशौर्यं प्रदर्शितवान्।
उत्तर— हल्दीघाटीयुद्धे प्रतापः 'चेतक' इति नामके अश्वे आरुह्य बहुशौर्यं प्रदर्शितवान्।
20. प्रतापस्य सेना केन कारणेन विघटिता?
उत्तर— प्रतापस्य सेना धनाभावे विघटिता।
21. प्रतापः कान् प्राप्तुं चिन्तनमारेभे?
उत्तर— प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनमारेभे।
22. प्रतापः कदापि किं न स्वीकृतवान्?
उत्तर— प्रतापः कदापि पराजयं न स्वीकृतवान्।
23. प्रतापः कुत्र उषित्वा सैन्यसंग्रहणम् उपाक्रमत्?
उत्तर— प्रतापः अरण्यगुहाप्रदेशेषु उषित्वा सैन्यसंग्रहणम् उपाक्रमत्।
24. प्रतापः कदा मेवाड़राज्यसिहांसनम् आरूढ़वान्?
उत्तर— प्रतापः स्ववयसः 32 तमे वर्षे मेवाड़राज्यसिंहासनम् आरूढवान्।
25. हल्दीघाटीयुद्धे कस्याः सेनायाः अतिक्षतिः जाता?
उत्तर— हल्दीघाटी—युद्धे मुगलसेनायाः अतिक्षतिः जाता।
26. सतां विभूतयः किमर्थम्?
उत्तर— सतां विभूतयः परोपकारार्थम्।
27. मरूप्रदेशे व्यापतानां मृत्युभोजनं, बालविवाहः, नार्युत्पीडनं, यौतुकप्रथादीनां कुप्रथानां निवारणाय सदैव कः सचेष्टः आसीत्?
उत्तर— स्वामिकेशवानन्दः सचेष्टः आसीत्।
28. स्वामिकेशवानन्दस्य हृदि कस्य अध्ययनेच्छा अड़्कुरिता?
उत्तर— स्वामिकेशवानन्दस्य हृदि संस्कृतस्य अध्ययनेच्छा अङकुरिता।
29. वि.सं. 1956 तमे आगतः दुर्भिक्षः केन नाम्ना कुख्यातः?
उत्तर— सः दुर्भिक्षः 'छप्पनियाअकाळ' इति नाम्ना कुख्यातः।
30. केशवानन्देन 'नागरी—प्रचारिणी सभा' कुत्र प्रारब्धा?
उत्तर— केशवानन्देन 'नागरी—प्रचारिणी सभा' अबोहर नगरे प्रारब्धा।
31. स्वामिकेशवानन्दस्य जीवनं कस्य निदर्शनमस्ति?
उत्तर— स्वामिकेशवानन्दस्य जीवनं सर्वपन्थसद्भावस्य निदर्शनमस्ति।
32. स्वामिकेशवानन्दः संस्कृतं कुत्र पठितवान्?
उत्तर— स्वामिकेशवानन्दः संस्कृतं फाजिल्कानगरे हरिद्वारे, अमृतसरे चापि पठितवान्।
33. बीरमा कस्मिन सम्प्रदाये दीक्षितः?
उत्तर— बीरमा उदासीसम्प्रदाये दीक्षितः।
34. एकलः बीरमा उत्तरस्याम् अहिण्डमानः कुत्र प्राप्तः?
उत्तर— एकलः बीरमा उत्तरस्यां अज्ञातमार्गे अहिण्डमानः पञ्जाबे फिरोजपुरं प्राप्तः।
35. बीरमा रोटिकायाः अक्षरज्ञानस्य च युगपत् दर्शनं कुत्र अकरोत्?
उत्तर— बीरमा रोटिकायाः अक्षरज्ञानस्य च युगपत् दर्शनं आर्यसमाजस्य अनाथालये अकरोत्।

36. बीरमाबालकस्य मातुः नाम किमासीत्?

उत्तर– बीरमाबालकस्य मातुः नाम साराँ इत्यासीत्।

37. स्वर्गादपि का गरीयसी?

उत्तर– जननी जन्मभूमिश्च।

38. विद्यायाः प्रकार द्वयं किमस्ति?

उत्तर– शस्त्रविद्या शास्त्र विद्या च।

39. ''स्वंस्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः'' इति कथनं कस्य कृते अस्ति?

उत्तर– भारतदेशस्य अग्रजन्मनः कृते अस्ति।

40. वयं किं नमस्यामः?

उत्तर– वयं राष्ट्रदृष्टिं नमस्यामः।

41. कस्य सन्ततिः भारती उच्यते?

उत्तर– भारतस्य सन्ततिः भारती उच्यते।

42. भारतभूमेः गीतानि के गायन्ति?

उत्तर– भारतभूमेः गीतानि देवाः गायन्ति।

43. के सर्वदा शिक्षणीयाः?

उत्तर– राष्ट्रियाः सर्वदा शिक्षणीयाः।

44. रामाय किं न रोचते?

उत्तर– रामाय स्वर्णमयी लङ्काऽपि न रोचते।

45. राष्ट्रे कदा शास्त्रचर्चा प्रवर्तते?

उत्तर– शस्त्रेण रक्षिते सति राष्ट्रे शास्त्रचर्चा प्रवर्तते।

46. स्वर्गापवर्गास्पदमार्गभूतं देशः कः?

उत्तर– स्वर्गापवर्गास्पदमार्गभूत देशः भारतदेशः।

47. वयं कीदृशीं राष्ट्रदृष्टि नमस्यामः?

उत्तर– वयं राष्ट्रमङ्गलकारिणीं राष्ट्रदृष्टिं नमस्यामः।

48. सम्प्राप्य भारते जन्म केषु पराङ्मुखः भवति।

उत्तर– सम्प्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः भवति।

49. सर्वे प्राणिनः केन तुष्यन्ति?

उत्तर– सर्वे प्राणिनः प्रियवाक्य प्रदानेन तुष्यन्ति।

50. महात्मानः कीदृशाः भवन्ति?

उत्तर– महात्मानः साङ्घिकाः भवन्ति।

51. कैः गौरवमायाति?

उत्तर– गुणैः गौरवमायति।

52. कुत्र दरिद्रता न कर्तव्या?

उत्तर– प्रियवचने दरिद्रता न कर्तव्या।

53. धेनौ तृणात् किं संजायते?

उत्तर– धेनौ तृणात् क्षीरं संजायते।

54. सर्पे कस्मात् विषं संजायते?

उत्तर– सर्पे क्षीरात् विषं संजायते।

55. कीदृशं मित्रं वर्जयेत्?

उत्तर– परोक्षे कार्यहन्तारम् प्रत्यक्षेप्रियवादिनं मित्रं वर्जयेत्।

56. कः सर्वं हरिष्यति?

उत्तर– हरिः सर्वं हरिष्यति।

57. कम् अविचारयन् हन्यात् एव?

उत्तर– आयान्तम् आततायिनम् अविचारयन् हन्यात् एव।

58. गृहीत इव केशेषु मृत्युना किम् आचरेत्?

उत्तर– गृहीत इव केशेषु मृत्युना धर्मम् आचरेत्।

शेखावाटी मिशन–100

59. अजरामरवत् किं चिन्तयेत् प्राज्ञः?
उत्तर– प्राज्ञः अजरामरवत् विद्यामर्थं च चिन्तयेत।
60. धनस्य पूरयिता हर्ता च कोऽस्ति?
उत्तर– धनस्य पूरयिता हर्ता च हरिः अस्ति।
61. पात्र–अपात्र विवेकः केन तुल्यं भवति?
उत्तर– पात्र–अपात्र विवेकः धेनुपन्नगयोः तुल्यं भवति।
62. खलस्य शक्तिः केषां परिपीडनाय?
उत्तर– खलस्य शक्तिः परेषां परिपीडनाय।
63. कुत्र लज्जा त्यक्तव्या सुखार्थिना?
उत्तर– सुखार्थिना धन–धान्य प्रयोगेषु, विद्यायाः संग्रहेषु, आहारे व्यवहारे च लज्जा त्यक्तव्या।
64. नरः कथं वारि अधिगच्छति?
उत्तर– नरः खनित्रेण खनन् वारि अधिगच्छति।
65. कः गुरूगतां विद्याम् अधिगच्छति?
उत्तर– शुश्रूषुः गुरूगतां विद्याम् अधिगच्छति।
66. साधोः विद्या धनं शक्तिः किमर्थं भवति?
उत्तर– साधोः विद्या ज्ञानाय, धनं दानाय, शक्ति परेषां रक्षणाय भवति।
67. मरू–सौन्दर्यम्' इति पाठानुसारेण '' शुष्कोऽपि नित्यं सरसः स देशः'' इति केन प्रशंसितः?
उत्तर– आचार्य चरकेण प्रशंसितः।
68. सैकतवप्रसानाः कुत्र सन्ति?
उत्तर– सैकतवप्रसानाः मरूप्रदेशे सन्ति।
69. आचार्यः चरकः कस्य विद्वान् आसीत्?
उत्तर– आचार्यः चरकः शरीरविज्ञानस्य विद्वान् आसीत्।
70. 'मरूसौन्दर्यम् ' इत्यस्मिन् पाठे कस्य ऋतोः वर्णनं अस्ति।
उत्तर– मरूसौन्दर्यम् ' इत्यस्मिन् पाठे वर्षा ऋतोः वर्णनं अस्ति।
71. मरौ स्फुटं के भान्ति?
उत्तर– मरौ स्फुटं सुमेरूशृङ्गाः भान्ति।
72. मरूदेशे मनुष्याणां मूर्ध्नि किम् दर्शनीयम्?
उत्तर– मरूदेशे मनुष्याणां मुर्ध्नि उष्णीषं दर्शनीयम्।
73. मरौ कीदृशाः कलिङ्गाः दृश्यन्ते?
उत्तर– मरौ तुन्दिलाः स्वादुरसाः कलिङ्गाः दृश्यन्ते।
74. मरूदेशे सैकतवप्राः (बालुका–स्तुपाः) कीदृशाः सन्ति?
उत्तर– ते रम्याः सुकोमलाः द्युतिमानाः हैमवर्णाः च सन्ति।
75. सरः सु शरत्प्रसन्नं सलिलं कदा चकास्ति?
उत्तर– सरः सु शरत्प्रसन्नं सलिलं वर्षासमये चकास्ति।
76. मरूदेशः कैः विशिष्टः अस्ति?
उत्तर– मरूदेशः स्नेहार्द्रभावैकरसैः विशिष्ट अस्ति।
77. प्रतापः कुत्र उपविष्टः आसीत्?
उत्तरम्– प्रतापः एकस्यां शिलायाम् उपविष्टः आसीत्।
78. भामाशाहः किम् आदाय प्रतापस्य समीपम् आगच्छति?
उत्तरम्– भामाशाहः धनराशिगृन्थिम् आदाय प्रतापस्य समीपम् आगच्छति।
79. भामाशाहः किमर्थं स्वसम्पतिं समर्पयति?
उत्तरम्– भामाशाहः देशरक्षायै स्वसम्पतिं समर्पयति।
80. प्रतापः कथं स्वदेशं रक्षितुम् इच्छति?
उत्तरम्– प्रतापः प्राणैः अपि स्वदेशं रक्षितुम् इच्छति?
81. किम् महत्पापम् अस्ति?
उत्तरम्– आत्महननं महत्पापम् अस्ति।

82. भामाशाहः कियत् धनं प्रतापाय ददाति?

उत्तरम्– भामाशाहः एतावत् विपुलं धनं प्रतापाय ददाति, येन धनेन द्वादश–वर्षाणि यावत् पञ्चविंशति सहस्र सैनिकाः सहर्षं योद्धुं शक्नुवन्ति स्म।

83. कः अरण्ये उपविष्टः खिन्नः भवति?

उत्तरम्– प्रतापः अरण्ये उपविष्टः खिन्नः भवति।

84. जाट–प्लेटो कः कथ्यते?

उत्तरम्– महाराजा सूरजमल्लः कथ्यते।

85. सूरजमल्लेन कति युद्धेषु विजयश्री प्राप्यते?

उत्तरम्– सूरजमल्लेन सप्तसु युद्धेषु विजयश्री प्राप्यते।

86. सूरजमल्लः अर्थशास्त्रेषु कः मन्यते?

उत्तरम्– सूरजमल्लः अर्थशास्त्रेषु कौटिल्यः मन्यते।

87. सूरजमल्लस्य मृत्युः कदा कथं च अभवत्?

उत्तरम्– सूरजमल्लस्य मृत्युः युद्धमानः रणे चाभिमुखे 25 दिसम्बर,1763 ई. वर्षे अभवत्।

88. कीदृशानि कार्याणि सेवितव्यानि?

उत्तरम्– अनवद्यानि कर्माणि सेवितव्यानि।

89. समावर्तन संस्कारस्य अवसरे कः शिष्यम् उपदिशति ?

उत्तरम्– समावर्तन संस्कारस्य अवसरे आचार्यः शिष्यम् उपदिशति।

90. कति वेदाः सन्ति ?

उत्तरम्– चत्वारः वेदाः सन्ति।

91. काभ्यां कार्याभ्यां न प्रमदितव्यम् ?

उत्तरम्– देवपितृ कार्याभ्यां न प्रमदितव्यम्।

92. केषु–केषु कार्येषु कदापि प्रमादः न करणीयः ?

उत्तरम्– सत्यात्, धर्मात्, कुशलात्, भूत्यै, स्वाध्याय–प्रवचनाभ्याम्, देवपितृकार्याभ्यां च कदापि प्रमादः न करणीयः।

93. कम् अनूच्य आचार्यः उपदिशति ?

उत्तरम्– वेदम् अनूच्य आचार्यः उपदिशति ?

94. आचार्यः कं अनुशासति ?

उत्तरम– आचार्यः अन्तेवासिनमनुशास्ति।

95. श्रद्धया किं कर्तव्यम् ?

उत्तरम्– श्रद्धया देयम्।

96. धनं प्राप्य प्रतापः किम् उद्घोषयति ?

उत्तरम्– धनं प्राप्य महाराणा प्रतापः उद्घोषयति यत् "अद्य अस्मात् एवं क्षणात् राणा स्वदेशस्य पारतन्त्र्य–शृंखलाः त्रोटयितुं शत्रून् संहारयितुं धर्मं रक्षितुं च योत्स्यते, अवश्यं योत्स्यते।"

97. भामाशाहः देश–धर्मयोः रक्षां कर्तुं कम् प्रति कथयति ?

उत्तरम्– भामाशाहः देश–धर्मयोः रक्षां कर्तुं प्रतापं प्रति कथयति।

98. कीदृशं मरणं कल्याणप्रदं कथ्यते ?

उत्तरम्– वीरगत्या मरणं कल्याणप्रदं कथ्यते।

99. आत्महननं तु केषां कर्म ?

उत्तरम्– आत्महननं तु नपुंसकानां कर्म।

100. कयोः द्वयोर्मेलनं धन्यमस्ति ?

उत्तरम्– भामाशाहप्रतापयोः मेलनं धन्यमस्ति।

101. नायकेषु अन्यतमः कः आसीत् ?

उत्तरम्– नायकेषु अन्यतमः सूरजमल्लः आसीत्।

102. खड्गं चलायमानं कं वीक्ष्य अरयोअपि विस्मिता जायन्ते स्म ?

उत्तरम्– सूरजमलः पाणियुगलेन खड्गं चलायमानं वीक्ष्य अरयोअपि विस्मिताः जायन्ते स्म।

103. भारतस्य राजनीतिः कदा दोलायमाना आसीत् ?

उत्तरम्– सूरजमलस्य जन्मसमये भारतस्य राजनीतिः दोलायमाना आसीत्।

104. सूरजमल्लः नीतिज्ञेषु कस्यः तुल्यः आसीत्।

उत्तरम्– सूरजमल्लः नीतिज्ञेषु कृष्णस्य तुल्यः आसीत्।

105. किं वद ?

उत्तरम्– सत्यं वद।

106. किं चर ?

उत्तरम्– धर्मं चर।

107. सत्यात् किन्न कर्त्तव्यम् ?

उत्तरम्– सत्यात् न प्रमादितव्यम्।

108. मातापितरौ कयोः तुल्यः भव ?

उत्तरम्– मातापितरौ देवयोः तुल्यः भव ?

109. कानि उपास्यानि ?

उत्तरम्– सुचरितानि उपास्यानि।

110. कः मुगलशासकः सूरजमल्लेन सह संधि कृतवान ?

उत्तरम्– मीर बख्शी सलावतखान–मुगलशासकः कृतवान।

111. सूरजमल्लः कस्योपरि प्रत्यक्षं प्रहारमकरोत् ?

उत्तरम्– सूरजमल्लः मुगलसाम्राज्यस्योपरि प्रत्यक्षं प्रहारम् अकरोत्।

## अनुवादकार्यम्

**1. अधोलिखितस्य पठित गद्यांशस्य हिन्दीभाषायाम् अनुवाद लिखत।**

बाल – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

प्रथमा– अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

द्वितीया– एषा खलु केसरिणी त्वां लंघयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि।

बालः (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

प्रथम– वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बाल– कुत्र? देहोतत् (इति हस्तं प्रसारयति)

प्रसंग– प्रस्तुत नाट्यांश हमारी ''स्पन्दना'' नाम की पाठ्यपुस्तक के पाठ ''जृम्भस्व सिंह/दन्तांस्ते गणयिष्ये'' से लिया गया है। मूलतः यह पाठ कालिदास रचित अभिज्ञानशाकुंतलम् के सप्तम अंक से संकलित है। इस अंश में बालक सर्वदमन के सिंह के बच्चे के साथ क्रीड़ा व दो तपस्विनियों के मध्य वार्तालाप का वर्णन है।

अनुवाद– बालक– सिंह! मुख खोलो, मैं तुम्हारे दाँतो को गिनूँगा। पहली तपस्विनी – विनम्रता से हीन! (निर्दयी) हमारी सन्तान के समान माने गये इन जीवों को क्यों परेशान कर रहे हो? ओह तुम्हारा क्रोध तो बढ़ रहा है।

ऋषियों द्वारा तेरा सर्वदमन नाम उचित ही रखा है।

दूसरी तपस्विनी – यह शेरनी अवश्य ही तुझ पर आक्रमण कर देगी, यदि तुम उसके बच्चे को नहीं छोड़ते हो।

बालक (मुस्कुराकर) अरे, तब तो मैं बड़ा डर गया हूँ। (यह कहकर अपना अधरोष्ठ दिखाता है)

पहली तपस्विनी – पुत्र! इस सिंह के बच्चे को छोड़ दो, मैं तुझे दूसरा खिलौना दूँगी।

बालक – कहाँ है? वह खिलौना मुझे दो। (यह कहकर हाथ फैलाता है)

**2. अधोलिखित पठित गद्यांशस्य हिन्दीभाषायाम् अनुवाद लिखत–**

**(प्रविश्य मृण्मयूरहस्ता)**

तापसी – सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व।

बालः – (सदृष्टिक्षेपम) कुत्र वा मम माता?

उभे – नाम सादृश्येन वञ्चितो मातृवत्सलः।

द्वितीया – वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

प्रसंग— प्रस्तुत नाट्यांश हमारी ''स्पन्दना'' पाठ्यपुस्तक के ''जृम्भस्व सिंह / दन्तांस्ते गणायिष्ये'' पाठ से लिया गया है। यह पाठ महाकवि कालिदास विरचित 'अभिज्ञानशाकुंतल' नाम के नाटक से संकलित है। इस नाटयांश में दो तपस्विनियों के मध्य मिट्टी के मोर की सुन्दरता का वर्णन है।

हिन्दी अनुवाद—

(मिट्टी का मयुर हाथ में लिए हुए तापसी प्रवेश करके)

तापसी — सर्वदमन! पक्षी के सौन्दर्य (शकुन्तलावण्य) को देखो।

बालक — (निगाह फेंकते हुए) कहाँ है मेरी माता?

दोनों — नाम की समानता के कारण बालक धोखा खा गया।

दूसरी — बेटा इस मिट्टी के मोर की सुन्दरता देख, ऐसा कहाँ गया है।

3. **अधोलिखित पठित गद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत—**

शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाड़राज्य—स्थितिः समीचीना न आसीत्। यद्यपि प्रतापस्य पिता महाराणा उदयसिंहः प्रतापी राजा आसीत्, किन्तु परिस्थितिवशात् चितौड़ादिस्थानानि आक्रान्तृभिरधिगृहीतानि। अतएव सिहांसनमधिरूढ़ः प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनभारेभे।

प्रथमं सः स्वस्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सभाम् आकारितवान्। तत्रैव सः प्रतिज्ञां कृतवान् — ''यावत् अहम् हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि, तावत् सुवग्रपात्रेषु भोजनं न करिष्यामि, राजप्रासादे वासं न करिष्यामि, मृदृतल्पे च शयनं न करिष्यामि।''

प्रसंग— प्रस्तुत गद्यांश हमारी पाठ्यपुस्तक 'स्पन्दना' के ''महाराणा प्रतापः'' शीर्षक पाठ से उद्धृत है। इसमें महाराणा प्रताप के देश—प्रेम, त्याग, दृढ़ प्रतिज्ञा एवं साहस का प्रेरणास्पद वर्णन किया गया है।

हिन्दी अनुवाद—

शत्रुओं के साथ लम्बे समय तक के युद्धों के कारण मेवाड़ राज्य की स्थिति ठीक नहीं थी। यद्यपि प्रताप के पिता महाराणा उदयसिंह प्रतापी राजा थे, किन्तु परिस्थिति के कारण चितौड़ आदि स्थानों को आक्रामणकारियों द्वारा अधिगृहीत कर लिये गये थे। इसलिये सिंहासन पर विराजमान प्रताप ने अपने नियंत्रण से अलग हुए प्रमुख दुर्गो को प्राप्त करने के लिए चिन्तन करना प्रारम्भ कर दिया।

सबसे पहले उन्होंने अपने स्वामिभक्त सामन्तों और स्थानीय भीलों की सभा बुलाई। वही पर उन्होंने प्रतिज्ञा की —

''जब तक मैं अपने नियन्त्रण से अलग हुए अपने राज्य के भागों को फिर से प्राप्त नहीं करूँगा, तब तक सोने के पात्रों में भोजन नहीं करूँगा, राजमहल में निवास नहीं करूँगा और कोमल बिस्तर पर शयन नहीं करूँगा।''

4. **अधोलिखितस्य पठित गद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत—**

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तथा सेनया च मुगलशासनं प्रति स्वातन्त्रययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान। तेषु मोही गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन काले 'चावण्ड' स्थानं स्थापत्य कलायाः ललित कलायाः, वाणिजस्य, विषायाश्च प्रमुख केन्द्रम् आसीत्।

प्रसंग— प्रस्तुत गद्यांश हमारी पाठ्यपुस्तक 'स्पन्दना' के 'महाराणा प्रतापः' शीर्षक पाठ से उद्धृत है। प्रस्तुत अंश में भामाशाह द्वारा प्राप्त सम्पति से महाराणा—प्रताप द्वारा सैन्य शक्ति का संग्रह करने, स्वतन्त्रता युद्ध करने का, अपने राज्यों को स्वतन्त्र कराने का प्रेरणास्पद वर्णन हुआ है।

हिन्दी अनुवाद—

उससे (भामाशाह के धन से) फिर से सैन्य—शक्ति का संग्रह कार्य प्रारम्भ कर दिया और उन्होंने विशाल सेना की रचना की और उस सेना के द्वारा मुगल शासक से स्वतन्त्रता का युद्ध प्रारम्भ कर दिया। अपने राज्य के अपने हाथ से निकले हुए अनेक भागों को पुनः अपने नियन्त्रण में कर लिया। उनमें मोही, गोगुन्दा, उदयपुर आदि मुख्य थे। अपने राज्य में शान्ति की स्थापना करके 'चावण्ड' नामक स्थान को अपनी राजधानी बनाया। उस समय 'चावण्ड' नामक स्थान स्थापत्य कला का, ललित काला का, व्यापार का और विद्या का प्रमुख केन्द्र था।

5. **अधोलिखितस्य पठित गद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत—**

स्वामिनो जीवनं सर्वपन्थसदभावस्य निदर्शनमस्ति। अयं हि जाट—जातौ जातः परं सिक्खगुरौ नानकदेवस्य पुत्रेण श्रीचन्देन प्रवर्तिते उदासी सम्प्रदाये दीक्षितः। गुरूग्रन्थस्योत्तमः पाठी अभूत्। एकादशवार्षिक—साधनया 700 पृष्ठान्मकस्य सिक्खेतिहासस्य लेखनं कारितवान्। विभाजनकालीने हिंसाचारे क्षतानां मुस्लिम बन्धूनां चिकित्साकारिता।



शेखावाटी मिशन-100

प्रसंग– प्रस्तुत गद्यांश हमारी पाठ्यपुस्तक 'स्पन्दना' के 'कर्मयोगी स्वामी केशवानन्दः' शीर्षक पाठ से उद्धृत है। इसमें स्वामी केशवानन्द के प्रेरणास्पद जीवन एवं कार्यो का वर्णन किया गया है।

हिन्दी अनुवाद–

स्वामी जी का जीवन सभी पन्थों के सद्भाव का उदाहरण है। यह जाट जाति में उत्पन्न हुआ है, किन्तु सिक्खों के गुरू नानकदेव के पुत्र श्रीचन्द द्वारा स्थापित उदासी–सम्प्रदाय में दीक्षित हुआ। गुरू ग्रन्थ का श्रेष्ठ पाठक बना। ग्यारह वर्षो की साधना से 700 पृष्ठों में सिक्खों के इतिहास लेखन का कार्य किया।

विभाजन के समय हिंसा होने पर घायल मुस्लिम भाईयों की चिकित्सा कराई।

6. **अधोलिखितस्य पठित गद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–**

स्वामिकेशवानन्दस्य जन्म पौष मासे 1940 तमे विक्रम–संवत्सरे (ईस्वी 1883) राजस्थानस्य सीकर– जनपदे मंगलुणा–ग्रामे अभवत्। अस्य पितुर्नाम ठाकुरसी ढ़ाका इति मातुश्च नाम साराँ इत्यासीत्। बाल्ये केशवानन्दस्य नाम 'बीरमा' इत्यासीत्। यदा एषः बालः सप्तवर्षकल्पः आसीत् तदैव उष्ट्रमेकमाश्रित्य रत्नगढ़–स्थले जीवनयापनं कुर्वन्नस्य पिता दिवंग्ड़तः।

प्रसंग– प्रस्तुत गद्यांश हमारी पाठ्यपुस्तक 'स्पन्दना' के कर्मयोगी स्वामी केशवानन्दः शीर्षक पाठ से उद्धृत है। इस अंश में स्वामी केशवानन्द का जीवन परिचय दिया गया है।

हिन्दी अनुवाद–

स्वामी केशवानन्द का जन्म पौष माह में विक्रम संवत् 1940 में (सन् 1883 ई.मे.) राजस्थान के सीकर जिले के ''मंगलुणा'' गांव में हुआ था। इनके पिता का नाम 'ठाकुर सी ढ़ाका' और माता का नाम साराँ था। बचपन में केशवानन्द का नाम 'बीरमा' था। जब यह बालक लगभग सात वर्ष का था, तभी एक ऊँट पर बैठकर 'रतनगढ़ नामक स्थान पर जीवनयापन करते हुए इनके पिता का स्वर्गवास हो गया।

7. **अधोलिखितस्य पठितगद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–**

महाराजस्य सूरजमलस्य जन्म वसन्तपंचम्याम् (13 फब्रवरी दिने) 1707 तमे ईस्वीयवर्षे अभवत्। स हि महाराजस्य बदनसिंहस्य ज्येष्ठपुत्रः तस्योत्तराधिकारी चासीत्। सूरजमल्लस्य अपरम् एकं नाम सुजानसिंहः इत्यासीत्। अष्टादश–शताब्दस्य भारतस्य नायकेषु अन्यतमः आसीत् सूरजमल्लः। तस्य जनिः तदा अभूत् यदा भारतदेशस्य राजनीतिः अत्यन्तं दोलायमाना आसीत्, भारतं च विध्वंसक–शक्तीनां बाहुपाशे सर्वथा निबद्धम् आसीत्। नादिरशाहः, अहमदशाहः अब्दाली इत्येताभ्यां पापिभ्याम् उत्तर–भारते महता प्रमाणेन नरवधाः गोवधाश्च क्रियन्ते सम, तीर्थानि मन्दिराणि च विध्वंस्तानि क्रियन्ते स्म। भारतं लुण्ठितुम् आगच्छतः बाह्मानाक्रमणकारिणः निरोद्धुं न कोऽपि शासकः सज्जः आसीत्।

हिन्दी अनुवाद–

महाराज सूरजमल्ल का जन्म वसन्त पंचमी (13 फरवरी के दिन) सन् 1707 ई. वर्ष में हुआ था। वह महाराज बदनसिंह के बड़े पुत्र और उत्तराधिकारी थे। सूरजमल्ल का एक दूसरा नाम सुजानसिंह था। अठारहवीं शताब्दी के भारत के नेताओं में सूरजमल्ल प्रमुख थे। उनका जन्म तब हुआ था, जब भारत देश की राजनीति डोलती हुई (अस्थिर) थी और भारत विनाशकारी शक्तियों की भुजाओं के बन्धन में जकड़ा हुआ था। नादिरशाह, अहमदशाह अब्दाली जैसे पापियो के द्वारा उत्तर–भारत में अत्यधिक मात्रा में मानव–वध और गायों का वध किया जा रहा था, तीर्थ और मन्दिरों का विनाश किया जा रहा था। भारत को लूटने के लिए आये हुए बाहरी आक्रमणकारियों को रोकने के लिए कोई भी शासक तैयार नहीं था।

8. **अधोलिखितस्य पठितगद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–**

जाट–जातौ सूरजमल्लः तदेव स्थानं धत्ते यत्खलु स्थानं विदेशीयेषु प्लेटो–नेपोलियन–लूथर इत्यादीनामस्ति कश्चिदेकः लेखकस्तु तं 'जाट–प्लेटो' इति विरुदेन भूषितवानेव। हिन्दु–इतिहासज्ञाः तं 18 शताब्दस्य 'कनिष्कः' इति मुस्लिमाश्त तं 'अन्तिमः प्रतापी हिन्दु–नरेशः' इति घोषितवन्तः। औपचारिक–शिक्षा–रहितोऽपि सूरजमल्लः वस्तुतः समकालीनेषु वीरेषु भीमः, नीतिज्ञेषु .ष्णाः, अर्थशास्त्रज्ञेषु च कौटिल्यः आसीत् इति मन्यते। सैय्यद गुलाम अली नकवी स्वीये 'इमादुस्सादात' इत्याख्ये ग्रन्थे लिखति यत् राजनीतेः, राजस्वस्य, नागरिक–न्यायस्य च प्रबन्ध–नैपुण्ये आसफजाह–बहादुर–निजामं विहाय हिन्दुस्थाने तत्समये नैकोऽपि कश्चिद् तत्तुल्यः आसीत्।

हिन्दी अनुवाद–

जाट–जाति में सूरजमल्ल वही स्थान धारण करते हैं, जो स्थान विदेशियों मे प्लेटो, नेपोलियन, लूथर आदि का है। किसी एक लेखक ने तो उनको 'जाट–प्लेटो' इस घोषणा से सुशोभित किया है। हिन्दू इतिहासकारों ने उनको 18वीं शताब्दी का 'कनिष्क' और मुसलमानों ने उनको 'अन्तिम प्रतापी हिन्दू–राजा' इस रूप में घोषित किया। औपचारिक शिक्षा से रहित होने पर सूरजमल्ल वास्तव में समकालीन वीरों में भीम, नीतिज्ञों में .ष्ण और अर्थशास्त्रज्ञों में कौटिल्य (चाणक्य) थे, ऐसा मानते हैं। सैय्यद गुलाम अली नकवी अपने 'इमादुस्सादात' नामक निपुणता में आसफजाह बहादुर निजाम को छोड़कर हिन्दुस्तान में उस समय एक भी कोई उसके समान नहीं था।

9. अधोलिखितस्य पठितगद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यानि अनवद्यानि कर्मणि तानि सेवित्यानि नो इतराणि । यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धयादेयम् श्रिया देयम्। हिया देयम्। भिया देयम्। संविदा देयम्। एषः आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।

हिन्दु अनुवाद–

माता देवता है, पिता देवता है। गुरू देवता है अतिथि देवता है (यह मानकर उनकी उपासना करनी चाहिए) जो भी प्रशंसनीय कर्म है, उन्हीं का सेवन करना चाहिए, अन्य का नहीं। जो हमारे श्रेष्ठ आचरण हैं, उनको ही तुम्हारे द्वारा अपनाना चाहिए, अन्य को नहीं। श्रद्धापूर्वक (दान) देना चाहिए। अश्रद्धा से कभी नहीं देना चहिए। पारलौकिक–भय से देना चाहिए। मित्रादि कार्य मानकर देना चाहिए। यही आदेश है। यही उपदेश है। यही वेदों का रहस्य (सार) है। यही ईश्वर वचन अर्थात् अनुशासन है। इसी प्रकार उपासना करनी चाहिए।

10. अधोलिखितस्य पठितगद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–

मेवाड़ाधिपतिः महाराणाप्रतापः अरण्ये स्वसहचरेण सह एकस्यां शिलायाम् उपविष्टः वर्तते। असौ प्राणैः अपि स्वदेशं रक्षितुम् इच्छति। साधनाभावात् किमपि कर्तुम् असमर्थः स मनसि किचित् विचारयन्नस्ति।

प्रतापः– अरे धिक माम्। यदि अहं मातृभूमिं रक्षितुं न शक्नोमि किम् अत्र वासेन मे प्रयोजनम्। दीर्घ निःश्वसिति। (ततः प्रविशति कश्चन राजपुत्रः सर्वदारः)

सर्वदारः– (राजोचितं प्रणम्य) विजयतां विजयतां महाराजः।

प्रतापः– (दीर्ध निःश्वास मुखम् उन्नमय्य च) धिक। विजय ध्वनिं .त्वा त्वम् किम् एवं मां लज्जयते भ्रातः।

सर्वदारः– प्राणाधार। किम् इदं भवान वदति ? स्वाधीनतायै सर्वे किम् अपि सोढम् भवतः सदा विजयः एव भविष्यति।

हिन्दी अनुवाद–

मेवाड़ के स्वामी महाराणा प्रताप वन में अपने साथी के साथ एक पर्वत–शिलाखण्ड पर बैठे हुए हैं। यह (प्रताप) प्राण देकर भी अपने देश की रक्षा करना चाहता है। साधनों के अभाव में कुछ भी करने में असमर्थ वह मन में विचार करता है।

प्रताप– अरे मुझको धिक्कार है। यदि मैं अपनी मातृभूमि की रक्षा नहीं कर सकता हूँ तो मेरा यहाँ निवास करने से कोई लाभ नहीं है, कहीं पर जाकर मैं अपने प्राणों का त्याग क्यों नहीं कर रहा हूँ ? (लम्बी श्वास छोड़ते है) तत्पश्चात कोई राजपूत वीर प्रवेश करता है।

सर्वदार– राजा के योग्य प्रणाम करके महाराज की विजय हो विजय हो।

प्रताप– लम्बीं सांस छोड़कर और मुख उठाकर हाय धिक्कार है। हे भाई! विजय ध्वनि करके क्या तुम भी मुझे लज्जित कर रहे हो ?

सरदार– हे प्राणा धार। (हम सभी के प्राणों के आधार स्वरूप प्रताप) आप यह क्या कह रहे हो? अपने धर्म के लिए आपने सभी कुछ किया है। स्वतंत्रता के लिए सभी कुछ सहन किया है। आपकी सदा विजय ही होगी।

प्रश्न–अधोलिखितस्य पठितपद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत–

**(1) गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गासपद मार्गभूते, भवन्ति भूयः पुरूषः सुरत्वात्।।**

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत है। इस पद्य में कवि ने मरूप्रदेश के अपूर्व सौन्दर्य एवं समृद्धि का वर्णन करते हुए कहा है कि–

व्याख्याः– देवता जहाँ गीत गाते हैं वे मनुष्य धन्य हैं जो स्वर्ग और मोक्ष की प्राप्ति का मार्गस्वरूप भारतदेश में देवता रूप से अथवा स्वर्ग से भी आकर पुनः उत्पन्न होते हैं।

**(2) सम्प्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः।**
**पीयूष–कलशं हित्वा विषभाण्डमुपाश्रितः।।**

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'स्वराष्ट्र–गौरवम्' शीर्षक पाठ से उद्धृत है। इस पद्य में कवि ने बताया गया है कि जो मनुष्य पवित्र भारत देश में जन्म लेकर भी सत्कर्म नहीं करता है, वह मानो अमृत को छोड़कर विष के पात्र को ग्रहण करने वाला होता है। कवि कहता है कि

व्याख्याः– भारत देश में जन्म प्राप्त करके भी जो मनुष्य सत्कर्मों से विमुख होता है वह अमृत के घड़े को छोड़कर जहर के पात्र को ग्रहण करने वाला होता है।



शेखावाटी मिशन–100

(3) एतद्देश–प्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत किया गया है। यह पद्य मूलतः 'मनुस्मृति' से संकलित है। इस पद्य में भारत देश की महिमा एवं गौरव को दर्शाते हुए कहा गया है कि संसार के सभी मनुष्यों को भरत के श्रेष्ठ लोगों से अपने– अपने गुण–धर्म की शिक्षा ग्रहण करनी चाहिए।

व्याख्याः– इस भारत देश में उत्पन्न हुए श्रेष्ठजनों के पास से पृथ्वी पर सभी मनुष्यों को अपने–अपने अनुसार गुण–व्यवहार आदि की शिक्षा प्राप्त करनी चाहिए।

(4) अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'स्वराष्ट्र–गौरवम्' शीर्षक पाठ से उद्धृत है। इस पद्य में श्रीराम के माध्यम से माता और मातृभूमि के महत्व को दर्शाया गया है।

व्याख्याः– हे लक्ष्मण। सोने से निर्मित लंका भी मुझे अच्छी नहीं लगती है। माता और मातृभूमि स्वर्ग से भी अधिक श्रेष्ठ होती है।

(5) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढ़ै पाषाण–खण्डेषु रत्नसंज्ञा विधियते।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में पृथ्वी पर जल, अन्न एवं सुभाषित इन तीनों को ही रत्न बताते हुए कहा गया है कि

व्याख्याः– पृथ्वी पर तीन रत्न हैं – जल, अन्न ओर सुभाषित। लेकिन मूर्ख लोगों के द्वारा पत्थरों के टुकड़ों में 'रत्न' नाम दिया जाता है।

(6) अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में विद्या और धन का अर्जन करते हुए हमेशा धर्माचरण करने की प्रेरणा दी गई है–

व्याख्याः– बुद्धिमान व्यक्ति स्वयं को अजर एवं अमर के समान मानकर विद्या एवं धन की प्राप्ति का विचार करना चाहिए तथा मृत्यु ने केश पकड़ रखे हैं अर्थात् मृत्यु निकट ही है, ऐसा मानकर धर्म का आचरण भी करना चाहिए।

(7) विद्या विवादाय धनंमदाय, शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में विद्या, धन एवं शक्ति का दुर्जन और सज्जनों द्वारा उपयोग किये जाने के अन्तर को बतलाया गया है।

व्याख्याः– दुष्ट व्यक्ति की विद्या विवाद करने के लिए धन घमण्ड के दिए तथा शक्ति दूसरों को पीड़ित करने के लिए होती है। किन्तु सज्जन की ये सब विपरीत होती है– सज्जन की विद्या ज्ञान के लिए धन दान के लिए तथा शक्ति दूसरों की रक्षा के लिए होती है।

(8) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेतादृशं मित्रं विषकुम्भं पयोमुखम्।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में पीठ पीछे कार्य को बिगाड़ने वाला और सामने मधुर बोलने वाले मित्र का त्याग कर देने की प्रेरणा देते हुए कहा गया है कि–

व्याख्याः– पीठ पीछे काम को बिगाड़नपे वाले तथा सामने मधुर बोलने वाले, जिसके ऊपर–ऊपर(मुख भाग पर) दूध लगा हो, ऐसे जहर से भरे घड़े के समान मित्र को त्याग देना चाहिए।

(9) अनुकुले विधौ देयं यतः पूरयिता हरिः।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति।।

प्रसंगः– प्रस्तुत पद्य हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में भाग्य अनुकूल हो अथवा प्रतिकूल हो, सदैव दान देने की प्रेरणा देते हुए कहा गया है कि–

व्याख्याः– भाग्य के अनुकूल होने पर दान देना चाहिए, क्योंकि देने वाला ईश्वर है। भाग्य के विपरीत होने पर भी दान देना चाहिए, क्योंकि वह ईश्वर वब कुछ छीन लेगा, अर्थात भाग्य अनुकूल हो या प्रतिकूल हो दान देना चाहिए, क्योंकि ईश्वर ही देने वाला और छीनने वाला है।

शेखावाटी मिशन–100

(10) अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः।
अहिंसा परमं सत्यं यतो धर्मः प्रर्वतते।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'सुभाषित—रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में अहिंसा धर्म के महत्व का वर्णन करते हुए कहा गया है कि—

व्याख्याः— अहिंसा सर्वोच्चा धर्म है, अहिंसा सर्वोच्च तपस्या है तथा अहिंसा ही सर्वोच्च सत्य है क्योंकि अहिंसा से ही धर्म चलता है। अर्थात् मन, वचन एवं कर्म से प्राणियों को पीड़ित न करना ही सर्वश्रेष्ठ धर्म, तप एवं सत्य है।

(11) धन—धान्य प्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'सुभाषित—रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में धन,—धान्यादि के व्यवहार में लज्जा का त्याग करने की प्रेरणा देते हुए कहा गया है कि—

व्याख्याः— धन—धान्यादि के प्रयोग में और विद्या का संग्रह करने में तथा भोजन एवं व्यवहार में लज्जारहित होकर सुखी होना चाहिए। अर्थात् इन सभी में जो लज्जा नहीं करता है, वह मनुष्य सुखी रहता है।

(12) पात्रापात्र — विवेकोऽस्ति धेनुपन्नगयोः इव।
तृणात्संजायते क्षीरं क्षीरात् संजायते विषम्।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'सुभाषित—रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में पात्र और अपात्र के भेद को गाय और सर्प के समान बतलाते हुए कहा गया है कि—

व्याख्याः— पात्र और अपात्र का भेद गाय और सर्प के समान होता है। गाय को घास खिलाने से उससे दूध उत्पन्न होता है तथा सर्प को दूध पिलाने से उससे जहर उत्पन्न होता है।

(13) मरूः सुवर्णो नहि येन दृष्टः किं तेन दृष्टं कुहचित् सुदृश्यम।
स्फुटं मरौ भान्ति सुमेरूश्रृड़गाः शिलासु कृष्णासु न तेहि मृग्याः।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत है। इस पद्य में कवि ने मरू—प्रदेश के सौन्दर्य और विभिन्न विशेषताओं का वर्णन किया है—

व्याख्याः— सुन्दर वर्ण वाला (स्वर्ण रूप) मरू—प्रदेश जिसने नहीं देखा, उसके द्वारा कहाँ पर दर्शनीय क्या देखा गया? अर्थात् कहीं पर भी दर्शनीय स्थल नहीं देखा गया। जो सुमेरू पर्वत के शिखर मरू—प्रदेश मे स्पष्ट सुशोभित होते हैं, उन्हें काली शिलाओं में नहीं खोजना चाहिए।

(14) वर्षागमे चारूमरूं विहाय क्वान्यत्र कस्यापि रमेत चितम्।
सरः सु वर्षासमयेऽपि यस्मिन् शरत्—प्रसन्नं सलिलं चकास्ति।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत है। इस पद्य में कवि ने वर्षाकालीन मरूप्रदेश मे सौन्दर्य का रमणीय वर्णन करते हुए कहा है कि—

व्याख्याः— वर्षा—काल में सुन्दर मरूस्थल को छोड़कर दूसरी जगह कहाँ किसका मन रमण कर सकता है? अर्थात् किसी का भी नहीं। जिस मरूस्थल में वर्षा के समय में भी सरोवरों में शरदऋतु के समान निर्मल जल सुशोभित होता है।

(15) गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदान यज्ञै।
किं नाम तन्न मरौ समृद्धः विद्या—समृद्धो भवता विधेयः।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत है। इस पद्य में कवि ने मरूप्रदेश के अपूर्व सौन्दर्य एवं समृद्धि का वर्णन का वर्णन करते हुए कहा है कि—

व्याख्याः— मरूस्थल में गायें प्रसन्न हैं, मनुष्य प्रसन्न हैं और व्रत, दान एवं यज्ञों से देवता भी प्रसन्न हैं। ऐसा क्या है, जिससे मरूप्रदेश सम्पन्न नहीं हैं, अर्थात् सभी से सम्पन्न है। अतः इस मरूप्रदेश को आपके द्वारा विद्या से सम्पन्न करना चाहिए।

(16) रम्ये क्वचित् सैकतःवप्र—सानौ सुकोमले भास्वति हैमवर्णे।
प्रातः प्रदोषे च सुखं स्थितानां केषां न चेतांसि विकासवन्ति।।

प्रसंगः— प्रस्तुत पद्य हमारी पाठ्य—पुस्तक 'स्पन्दना' के 'मरूसौन्दर्यम्' शीर्षक पाठ से उद्धृत है। इस पद्य में स्वर्णमय मरू—प्रदेश के सौन्दर्य एवं वैशिष्ट्य का वर्णन किया गया है।

व्याख्याः— कहीं पर रमणीय, सुकोमल, कान्तिमान्, स्वर्णिम मिट्टी के टीलों अथवा धोरों की चोटी पर सुबह और रात में सुखपूर्वक बैठे हुए किन लोगों के चित प्रफुल्लित नहीं होते हैं? अर्थात् सभी के मन प्रसन्न होते हैं।

शेखावाटी मिशन—100

1. अधोलिखितापठितान् गद्यांशान् पठित्वा एतदाधारितप्रश्नानाम् उतराणि यथानिर्देशं लिखत–

परेषाम् उपकारः परोपकारः उच्यते। ''सर्वः स्वार्थं समीहते'' इत्यपि कस्यचित् कवेः उक्तिः अस्ति।

स्वार्थाय सर्वेऽपि प्राणिनः जीवन्ति। किन्तु यस्य जीवनम् अन्येभ्यः अस्ति, अपरेषां प्राणिनां सुखाय यः प्रयतते, कष्टं सहते च वस्तुतः तस्यैव जीवनं सार्थकम् अस्ति। पश्य, गावः अन्येभ्यः दुग्धं प्रयच्छन्ति, अतः जनाः ''मातर'' इति वदन्ति। नदी अपि स्वजलं स्व्यं न पिवति, अन्येषां प्राणिनां कृते ददाति। मेघान् पश्यत् स्वजलं सर्वेभ्यः वितरन्ति। पुष्पाणि सर्वेभ्यः सुगन्धं वितरन्ति। वृक्षाः फलानि प्रयच्छन्ति। मातृसमा उपकारिणी का विद्यते जगते? अतः स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम्।

प्रश्न 1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

उतर – परोपकारः

प्रश्न 2. सर्वं किं समीहन्ते?

उतर – सर्वं स्वार्थ समीहन्ते।

प्रश्न 3. काः अन्येभ्यः दुग्धं प्रयच्छन्ति?

उतर – गावः अन्येभ्यः दुग्धं प्रयच्छन्ति।

प्रश्न 4. किं नाम परोपकारः ?

उतर – परेषाम् उपकारः नाम परोपकारः।

प्रश्न 5. किं वरं विद्यते?

उतर – स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम्।

2. अस्मिन् संसारे असंख्याः भाषा सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा विद्यते। संस्कृता परिष्कृता दोषरहिता भाषा एव संस्कृत भाषा कथ्यते। इयमेव भाषा देवभाषा, गीर्वाणगीः, सुरवाणी इत्यादिभिः शब्दैः संबोध्यते। एतानि नामानि एव अस्याः भाषायाः महत्वं सूचयन्ति।

संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणां मूलरूप ज्ञानाय एतस्या आवश्यकता भवति। यादृशं महत् साहित्यं संस्कृत भाषायाः अस्ति तादृशं अन्यासां भाषाणाम् नास्ति। अस्यामेव भाषायां ब्राह्मणग्रन्थाः आरण्यकाः आध्यात्मिकविषयप्रतिपादिका उपनिषदः, वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकाव्यं महाभारतमपि संस्कृतस्य गौरवं वर्धयतः। अनयोः ग्रन्थयोः विषयं गृहीत्वा एवं विशालस्य (संस्कृत) साहित्यस्य रचना संजाता।

यथानिर्देश प्रश्नानाम् उत्तराणि लिखत –

प्रश्न 1. अस्यं गद्यांशस्य समुचितं शीर्षकं लिखत।

उतर – संस्कृतभाषायाः महत्वम्।

प्रश्न 2. सर्वभाषाणां मूलरूपं ज्ञानाय कस्याः आवश्यकता भवति?

उतर – संस्कृतभाषायाः।

प्रश्न 3. सर्वोत्तमा भाषा का विद्यते?

उतर – संस्कृतभाषा।

प्रश्न 4. संस्कृतभाषा कैः शब्दैः संबोध्यते?

उतर – संस्कृतभाषा देवभाषा, गीर्वाणगीः, सुरवाणी, इत्यादिभिः शब्दैः संबोध्यते।

प्रश्न 5. वीरकाव्यं किम् कथ्यते?

उतर – वीरकाव्यं महाभारतं कथ्यते।

3. मानव जीवने श्रमस्य महत्वं सर्वे जनाः जानन्ति। मानवः श्रममाश्रित्यैव सुखसमृद्धिं प्राप्नोति। जनः सुखं वाञ्छति मनोरथं पूरयितुमभिलषति, जीवने समुन्नतिं कांक्षते, तत्सर्वस्य साधनं श्रममेव वर्तते। श्रम एव मानवस्य स्वाभिमानं शारीरिक शक्तिं च प्रसारयति, सर्वेषु कार्येषु तस्य दक्षतामापादयति। अत एव श्रमेणेव सर्वत्र साफल्यं मिलति।

जनैः सदा सः श्रमः कर्तत्व्यः यतः सम्पतेरूद्भवो भवति, यतोहि व्यर्थं परिश्रमं कुर्वन् नरः पापभाक् भवति। प्रज्ञाः तुर्येऽपि वयसि परमं श्रमं न त्यजेयुः। यस्मिन् देशे जनाः पूर्णश्रम परायणाः भवन्ति तत्र वसुन्धराः धर्नेर्धान्यः पूर्णा विराजते। धिषणा श्रम संयोगः सर्वकार्येषु सिद्धिः भवति।

अश्रमाधिषणा व्यर्था भवति तथा च अधिषणः श्रमः व्यर्थः भवति। अतएव स्वस्थ लोकस्य चोन्त्तये सदैव श्रमः कृर्तव्यः।

यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत –

प्रश्न 1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

